# Shri Ganesha Namashtaka Stotram

# શ્રીગણેશનામાષ્ટકસ્તોત્રમ્

## Document Information

Text title : gaNeshanAmAShTakastotram from Brahmanda Purana 2.42

File name : gaNeshanAmAShTakastotram.itx

Category : ganesha, aShTaka

Location : doc_ganesha

Proofread by : NA

Description/comments : Brahmanda Purana Verses 2.42.28 through 2.42.44

Latest update : August 24, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

Shri Ganesha Namashtaka Stotram

# શ્રીગણેશનામાષ્ટકસ્તોત્રમ્

શ્રીકૃષ્ણ ઉવાચ -
શ્રુણુ દેવિ મહાભાગે વેદોક્તં વચનં મમ ।
યચ્છ્રુત્વા હર્ષિતા નૂનં ભવિષ્યસિ ન સંશયઃ ।
વિનાયકસ્તે તનયો મહાત્મા મહતાં મહાન્ ॥

યં કામઃ ક્રોધ ઉદ્વેગો ભયં નાવિશતે કદા ।
વેદસ્મૃતિપુરાણેષુ સંહિતાસુ ચ ભામિનિ ॥

નામાન્યસ્યોપદિષ્ટાનિ સુપુણ્યાનિ મહાત્મભિઃ ।
યાનિ તાનિ પ્રવક્ષ્યામિ નિખિલાઘહરાણિ ચ ॥

પ્રમથાનાં ગણા યે ચ નાનારૂપા મહાબલાઃ ।
તેષામીશસ્ત્વયં યસ્માદ્ગણેશસ્તેન કીર્ત્તિતઃ ॥ ૧॥ ગણેશઃ

ભૂતાનિ ચ ભવિષ્યાણિ વર્તમાનાનિ યાનિ ચ ।
બ્રહ્માણ્ડાન્યખિલાન્યેવ યસ્મિંલ્લમ્બોદરઃ સ તુ ॥ ૨॥ લમ્બોદરઃ

યઃ શિરો દેવયોગેન છિન્નં સંયોજિતં પુનઃ ।
ગજસ્ય શિરસા દેવિ તેન પ્રોક્તો ગજાનનઃ ॥ ૩॥ ગજાનન

ચતુર્થ્યામુદિતશ્ચન્દ્રો દર્ભિણા શપ્ત આતુરઃ ।
અનેન વિધૃતો ભાલે ભાલચન્દ્રસ્તતઃ સ્મૃતઃ ॥ ૪॥ તતોઽભવત્ ભાલચન્દ્રઃ

શપ્તઃ પુરા સપ્તભિસ્તુ મુનિભિઃ સઙ્ક્ષયં ગતઃ ।
જાતવેદા દીપિતોઽભૂદ્યેનાસૌ શૂર્પકર્ણકઃ ॥ ૫॥ શૂર્પકર્ણઃ

પુરા દેવાસુરે યુદ્ધે પૂજિતો દિવિષદ્ગણૈઃ ।
વિઘ્નં નિવારયામાસ વિઘ્નનાશસ્તતઃ સ્મૃતઃ ॥ ૬॥ વિઘ્નનાશઃ

અદ્યાયં દેવિ રામેણ કુઠારેણ નિપાત્ય ચ ।
દશનં દૈવતો ભદ્રે હ્યેકદન્તઃ કૃતોઽમુના ॥ ૭॥ એકદન્તઃ

ભવિષ્યત્યથ પર્યાયે બ્રહ્મણો હરવલ્લભઃ ।
વક્રીભવિષ્યત્તુણ્ડત્વાદ્વક્રતુણ્ડઃ સ્મૃતો બુધૈઃ ॥ ૮॥ વક્રતુણ્ડઃ

એવં તવાસ્ય પુત્રસ્ય સન્તિ નામાનિ પાર્વતી ।
સ્મરણાત્પાપહારીણિ ત્રિકાલાનુગતાન્યપિ ॥ ૯॥

અસ્માત્રયોદશીકલ્પાત્પૂર્વસ્મિન્દશમીભવે ।
મયાસ્મૈ તુ વરો દત્તઃ સર્ગદેવાગ્રપૂજને ॥ ૧૦॥

જાતકર્માદિસંસ્કારે ગર્ભાધાનાદિકેઽપિ ચ ।
યાત્રાયાં ચ વણિજ્યાદૌ યુદ્ધે દેવાર્ચને શુભે ॥ ૧૧॥

સઙ્કુષ્ટે કામ્યસિદ્ધ્યર્થં પૂજયેદ્યો ગજાનનમ્ ।
તસ્ય સર્વાણિ કાર્યાણિ સિદ્ધ્યન્ત્યેવ ન સંશયઃ ॥ ૧૨॥

ઇતિ શ્રીબ્રહ્માણ્ડે મહાપુરાણે વાયુપ્રોક્તે મધ્યભાગે તૃતીય
ઉપોદ્ઘાતપાદે ભાર્ગવચરિતે દ્વિચત્વારિંશત્તમોઽધ્યાયાન્તર્ગતં
શ્રીકૃષ્ણપ્રોક્તં શ્રીગણેશનામાષ્ટકસ્તોત્રં સમ્પૂર્ણમ્ ॥ ૪૨॥

From Brahmanda Purana Verses 2.42.28 through 2.42.44
NA

---

*Shri Ganesha Namashtaka Stotram*
pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*